# A-I/1/22ANYS1CCTC1/23

**प्रथमसत्रार्द्धः**

**प्रथमपत्रम् (DSCC-16)**

**न्यायः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. विषयतायाः विषयस्वरूपत्वे को दोषः?
2. प्रतियोगितायाः प्रतियोगिस्वरूपत्वे को दोषः?
3. त्रिविधविषयताः नाम्ना निर्दिशत।
4. सहजशक्तिं उदाहरत।
5. किं नाम प्रतिबन्धकत्वम्?
6. शक्तेः पदार्थान्तरत्ववादिनः के? तेषां मते दाहं प्रति किं कारणम्?
7. सिद्धान्ते दाहं प्रति किं कारणम्?
8. आधेयशक्तिं उदाहरत।
9. किं नाम सादृश्यम्?
10. न्यायमते वृत्तिः कतिविधा? नाम्ना निर्दिशत।
11. व्यसनायाः अतिरिक्तवृत्तित्वं कैः अङ्गीक्रियते?
12. का नाम ज्ञातता?
13. शक्तौ सहजत्वं नाम किम्?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. आधेयत्व–आधारत्वयोः अतिरिक्तपदार्थत्वं यथाग्रन्थं व्यवस्थापयत।
15. सहजशक्तेः पदार्थान्तरत्वमाशङ्क्य निराकुरुत।

16. परमाणुषु शक्तिस्वीकारम् आशङ्क्य निराकुरुत।

17. यथाग्रन्थं सादृश्यपदार्थस्य परीक्षणं कुरुत।

18. लक्षणावृत्तिं प्रतिपाद्य तत्रैव गौण्याः अन्तर्भावं निरूपयत।

19. व्यञ्जनायाः अतिरिक्तवृत्तिताम् आशङ्क्य निराकुरुत।

## खण्डः - ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. विषयतायाः विषय-ज्ञान-तदुभयस्वरूपत्वे दोषान् यथाग्रन्थं विशदयत।

21. यथाग्रन्थं आधेयशक्तिं विमृशत।

22. ज्ञाततायाः अतिरिक्तपदार्थत्वमाशङ्क्य निराकुरुत।

# A-I/2/22ANYS1CCTC2/23

## प्रथमसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-17)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. मणिकारोक्तं प्रथमं हेत्वाभाससामान्यलक्षणं किम्?
2. प्रथमलक्षणे अनुमितिपदं किंपरम्?
3. 'ह्रदो वह्निमान् धूमात्' इत्यत्र बाध-सत्प्रतिपक्षदोषौ कौ?
4. लक्षणे यथार्थपदं किमर्थम्?
5. किं नाम सर्वांशे प्रमात्वम्?
6. को नाम स्वरूपासिद्धिदोषः? स च कुत्र?
7. द्वितीयं हेत्वाभासलक्षणं (मण्युक्तं) किम्?
8. 'यद्विषयकत्त्वेन' इत्यत्र तृतीयाविभक्त्यर्थः कः?
9. 'यद्विषयकत्त्वेन लिङ्गज्ञानस्य' इत्यत्र ज्ञानपदेन किं विवक्षितम्?
10. ह्रदो वह्निमान् धूमात् इत्यादौ 'जातिमान् वह्न्यभाववान्' इति ज्ञानमादाय अव्याप्तिवारणाय लक्षणे किं दलं निवेशनीयम्?
11. लक्षणे विशिष्टान्तराघटितत्वदलं किमर्थम्?
12. विशिष्टद्वयघटितत्वदलार्थः कः?
13. 'अत्र वदन्ति' कल्पे निवेशितः उभयाभावः कः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. अनुमितिकारणीभूतेत्यादिलक्षणस्य व्यभिचारे समन्वयं दर्शयत।
15. लक्षणे अनुमितौ प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वदलनिवेशस्य सार्थक्यं स्पष्टयत।

16. यथार्थज्ञानदलस्य सार्थक्यं प्रतिपादयत।

17. यद्विषयकत्वेन इत्यादि लक्षणस्य सत्प्रतिपक्षे समन्वयं दर्शयत।

18. मेयत्वविशिष्टव्यभिचारे लक्षणस्य अतिव्याप्तिम् आशंक्य निराकुरुत।

19. 'अत्र वदन्ति' इति कल्पोक्तलक्षणस्य बाधे समन्वयं दर्शयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. प्रथमहेत्वाभासलक्षणे अनुमितिपदार्थं विचार्य क्वचित् लक्ष्ये समन्वयं प्रदर्शयत।

21. हेत्वाभासद्वितीयलक्षणस्य बाधे समन्वयं प्रदर्श्य मेयत्वविशिष्टव्यभिचारे अतिव्याप्तिमाशंक्य, विशिष्टान्तराघटितत्वदलेन वारयत।

22. ग्रन्थोक्तदिशा अत्रवदन्तिकल्पं विचारयत।

# A-I/3/22ANYS1CCTC3/23

**प्रथमसत्रार्द्धः**

**तृतीयपत्रम् (DSCC-18)**

**न्यायः**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नाः) × 02 (अङ्काः) = 20**

1. न्यायमते का नाम शक्तिः? उदाहरत।
2. सङ्केतः कतिविधः? नाम्ना निर्दिशत।
3. वाच्यवाचकादिपदघटकस्य वच्–धातोः कोऽर्थः?
4. का नाम लक्षणा? उदाहरत।
5. गुरुमते पदानां कुत्र शक्तिः?
6. ज्ञानशक्तिवादिनां मते तद्वाचकत्वं नाम किम्?
7. अन्विताभिधानवादिनः के?
8. पदानां 'तद्विशिष्टे शक्तिः' इत्यस्य कोऽर्थः?
9. प्रवृत्तिनिमित्तस्य लक्षणं किम्?
10. 'जात्याकृतिव्यक्तयः पदार्थः' इत्यत्र आकृतिपदार्थः कः?
11. आत्मनिष्ठप्रत्यासत्त्या उपस्थितिशाब्दबोधयोः कार्यकारणभावः कथम्?
12. जातिशक्तिवादे शाब्दबोधे व्यक्तिभानं कथम्?
13. को नाम शाब्दबोधः?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नाः) × 05 (अङ्काः) = 20**

14. यथाग्रन्थं वृत्तिपदार्थं विमृशत।
15. ग्रन्थोक्तदिशा वाच्यवाचकादिपदे धात्वर्थं विचारयत।
16. अपभ्रंशपदानां वाचकत्वं साधुत्वं च आशङ्क्य निराकुरुत।

17. ज्ञानशक्तिवादम् अनूद्य खण्डयत।

18. "आकृतिविशिष्टव्यक्तौ लक्षणा" इति मतं प्रतिपादयत।

19. कुब्जशक्तिवादं दर्शयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. मीमांसकानुयायिमतनिरासपूर्वकं शक्तेः सङ्केतस्य सम्बन्धत्वं व्यवस्थापयत।

21. शक्तिज्ञानजन्योपस्थितिशाब्दबोधयोः कार्यकारणभावं व्यवस्थापयत।

22. पदानां जातौ शक्तिरिति पूर्वपक्षम् अनूद्य न्यायमतरीत्या विशिष्टव्यक्तौ शक्तिं व्यवस्थापयत।

# A-I/4/22ANYS1CCTC4/23

## प्रथमसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-19)

## न्यायः

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. आत्मनः इन्द्रियाद्यधिष्ठातृत्वं नाम किम्?
2. परदेहे आत्मसाधकम् अनुमानं किम्?
3. प्रवृत्तिसामान्यं प्रति किं कारणम्?
4. इच्छादीनाम् आत्माश्रिततत्वसाधकं परिशेषानुमानं किम्?
5. बौद्धाभिमतः आत्मा किंस्वरूपः?
6. सांख्यमते पुरुषस्य संसारापवर्गौ कथम्?
7. आत्मत्वजातिः कथं सिद्ध्यति?
8. वेदान्तमते आत्मपदार्थः कः?
9. किं नाम विभुत्वं मूर्तत्वं च?
10. इच्छादयः भूतगुणाः भवन्ति न वा? कुतः?
11. बौद्धाभिमतं विज्ञानद्वयं किम्?
12. आत्मनः ज्ञानस्वरूपत्वप्रतिपादकश्रुतिः का?
13. शरीरस्य आत्मत्वे को दोषः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. आत्मत्वजातिं यथाग्रन्थं संसाधयत।
15. शरीरस्य आत्मस्वरूपत्वम् आशङ्क्य निराकुरुत।

16. ‘आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्’ अस्याभिप्रायं स्पष्टयत।
17. आत्मसाधककार्यत्वलिङ्गकानि अनुमानानि विलिख्य प्रदर्शयत।
18. आत्मविचारे जैनमतं विमृशत।
19. सांख्यमतमवलम्ब्य आत्मस्वरूपं विचारयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. आत्मसाधकानि अनुमानानि विस्तरेण परिशीलयत।
21. यथाग्रन्थं आत्मविचारे बौद्धमतं परिशीलयत।
22. वेदान्तमताभिमतम् आत्मस्वरूपमनूद्य निराकुरुत।